Department of Public Instruction, Mysore.

संस्कृतप्रथमपुस्तकम्

FIRST EDITION—5,000 COPIES

MYSORE
PRINTED AT THE GOVERNMENT BRANCH PRESS
1926

द्वितीयः पाठः.

बालः गतः। बालश्शालां गतः। बालस्य हस्
पुस्तकमस्ति। बालः पुस्तकं पठति। आचार्यः शालायामस्ति
अचार्यः पाठं पाठयति। आचार्यः बालं पाठयति। बाल
गताः। बालाश्शालां गताः। बालानां हस्तेषु पुस्तका
सन्ति। बालाः पुस्तकानि पठन्ति। आचार्याः शाला
सन्ति। आचार्याः पाठान् पाठयन्ति। आचार्याः बाल
पाठयन्ति।

बालः अस्ति	पुस्तकमस्ति	बालः पठति
बालौ स्तः	पुस्तके स्तः	बालौ पठतः
बालाः सन्ति	पुस्तकानि सन्ति	बालाः पठन्ति

को गतः? कः कुत्र गतः? बालस्य हस्ते किमस्ति
कस्य हस्ते पुस्तकमस्ति? आचार्यः कुत्रास्ति? के गता
के कुत्र गताः? केषां हस्तेषु कानि सन्ति? बाला
हस्तेषु कानि सन्ति? कः अस्ति? कौ स्तः? के सन्ति
किमस्ति? के स्तः? कानि सन्ति? कः पठति? कौ पठत
के पठन्ति? किं स्वच्छमस्ति? किमुष्णमस्ति? किं नी
मस्ति? उष्णः कः? शीतः कः? किं श्वेतमस्ति?
पीतमस्ति।

तृतीयः पाठः

कोसलेषु अयोध्यानगरमस्ति। अयोध्यानगरस्य मध्ये
सादोऽस्ति। प्रासादे दशरथोऽस्ति। दशरथो नरपतिः।
सादे चरास्सन्ति। प्रासादे सेवकाश्च सन्ति। दशरथस्य
ास्सन्ति। रामः प्रथमः पुत्रः। लक्ष्मणो द्वितीयः
ः। भरतः तृतीयः पुत्रः। शत्रुघ्नः चतुर्थः पुत्रः। पुत्राः
न्ति। पुत्राः प्रासादे पठन्ति। प्रासादे पाठशालाऽस्ति।
रथो बहिर्गतः। बालाश्च बहिर्गताः। दशरथेन सह बालाः
र्गताः। सेवकाः बहिर्गताः। दशरथः रामः लक्ष्मणः
तः शत्रुघ्नः सेवकाश्च बहिर्गताः। दशरथो बालाश्च प्रत्या-
ः। सेवकाश्च प्रत्यागताः। दशरथः प्रासादं प्रत्यागतः।
ास्सेवकाश्च प्रासादं प्रत्यागताः। दशरथः आसने निषण्णः।
आसने निषण्णः। लक्ष्मणो भरतश्शत्रुघ्नश्च आसने
ण्णाः। सेवका दूरे स्थिताः। सेवकाः अन्तर्गताः।
काः बहिर्गताः। वसिष्ठ आगतः। वसिष्ठः रामं पाठयति।
ष्ठः लक्ष्मणं पाठयति। भरतं शत्रुघ्नं च पाठयति। रामः
न्ति। लक्ष्मणो भरतश्शत्रुघ्नश्च पठन्ति। पाठस्समाप्तः।
कालो गतः। भोजनकालः संप्राप्तः। दशरथो बालाश्च
नाय गताः।

स अयोध्यानगरं कुत्रास्ति? अयोध्यानगरस्य मध्ये कोऽ-
स्त? प्रासादे कोऽस्ति? कुत्रास्ति दशरथः? दशरथः कः?

किं दशरथस्य पुत्रा स्सन्ति ? कः प्रथमः पुत्रः ? को द्वितीयः ? कस्तृतीयः ? कश्चतुर्थः ? पुत्राः पठन्ति कम् ? दशरथः क गतः ? दशरथेन सह के के बाहिर्गताः ? दशरथः कं प्रत्यागतः ? दशरथेन सह के के प्रत्यागताः ? दशरथः कुत्र निषण्णः ? बालाः कुत्र निषण्णाः ? सेवकाः कुत्र स्थिताः ? सेवकाः कुत्र गताः ? क आगतः ? वसिष्ठः कं पाठयति ? पाठानन्तरं दशरथो बालाश्च कुत्र गताः ?

चतुर्थः पाठः.

नीलो घटः । नीलं इन्दीवरम् । नीला शाटी । रक्तः पटः । रक्तं कमलम् । रक्ता शाटी । नीलघटोऽस्ति । नीलेन्दीवरं तटाकेऽस्ति । नीलशाटी गृहेऽस्ति । रक्तपटोऽस्ति । रक्तकमलं तटाकेऽस्ति । रक्तशाटी गृहेऽस्ति । रामो लक्ष्मणश्च गतौ । रामलक्ष्मणौ गतौ । रामो लक्ष्मणश्शत्रुघ्नश्च गताः । रामलक्ष्मणशत्रुघ्ना गताः । रामो दशरथस्य पुत्रः । रामो दशरथपुत्रः । लक्ष्मणो दशरथस्य पुत्रः । लक्ष्मणो दशरथपुत्रः । शत्रुघ्नो दशरथस्य पुत्रः । शत्रुघ्नो दशरथपुत्रः । भरतो दशरथस्य पुत्रः । भरतो दशरथपुत्रः । रामो लक्ष्मणो भरतश्शत्रुघ्नश्च दशरथस्य पुत्राः । रामलक्ष्मणभरतशत्रुघ्ना दशरथपुत्राः ।

को नीलः ?	घटो नीलः ।
किं नीलम् ?	इन्दीवरं नीलम् ।
का नीला ?	शाटी नीला ।
को रक्तः ?	पटो रक्तः ।
किं रक्तम् ?	कमलं रक्तम् ।
का रक्ता ?	शाटी रक्ता ।

रामः कस्य पुत्रः ? रामो दशरथस्य पुत्रः । दशरथपुत्रः । लक्ष्मणः कस्य पुत्रः ? लक्ष्मणो दशरथस्य पुत्रः । दशरथपुत्रः । भरतः कस्य पुत्रः ? भरतो दशरथस्य पुत्रः । दशरथपुत्रः । शत्रुघ्नः कस्य पुत्रः ? शत्रुघ्नो दशरथस्य पुत्रः । दशरथपुत्रः । रामलक्ष्मणभरतशत्रुघ्नाः कस्य पुत्राः ? दशरथस्य पुत्राः । दशरथपुत्राः ।

पञ्चमः पाठः.

यो दशरथस्य प्रथमः पुत्रः स रामः ।
यो दशरथस्य द्वितीयः पुत्रः स लक्ष्मणः ।
यो दशरथस्य तृतीयः पुत्रः स भरतः ।
यो दशरथस्य चतुर्थः पुत्रः स शत्रुघ्नः ।

रामं पश्य । लक्ष्मणं पश्य । भरतं पश्य । शत्रुघ्नं पश्य । स रामं पश्यति । स लक्ष्मणं पश्यति । स भरतं पश्यति । स शत्रुघ्नं पश्यति । चत्वारि फलानि सन्ति । एकं रामेण

भक्षितम् । द्वितीयं लक्ष्मणेन भक्षितम् । तृतीयं भरतेन भक्षितम् । चतुर्थं शत्रुघ्नेन भक्षितम् । प्रथमम् फलं रामाय । द्वितीयं फलं लक्ष्मणाय । तृतीयं फलं भरताय । चतुर्थं फलं शत्रुघ्नाय । गृहात् रामो गतः । वनात् लक्ष्मणो गतः । पर्वतात् भरतो गतः । तटाकात् शत्रुघ्नो गतः । रामस्य वस्त्रम् । लक्ष्मणस्य पुस्तकम् । भरतस्य कंचुकम् । शत्रुघ्नस्य खड्गः । रामो गृहं गतः । भरतो वनं गतः । लक्ष्मणो नगरं गतः ।

दशरथस्य प्रथमः पुत्रः कः? द्वितीयः पुत्रः कः? तृतीयः कः? चतुर्थः कः? स कं पश्यति? रामेण किं भक्षितम्? लक्ष्मणेन भरतेन शत्रुघ्नेन किं भक्षितम्? कतमं फलं रामाय? द्वितीयं कस्मै? तृतीयं कस्मै? चतुर्थं कस्मै? गृहात् को गतः? वनात्को गतः? पर्वतात्को गतः? तटाकात्को गतः? कस्य वस्त्रम्? कस्य पुस्तकम्? कस्य कंचुकम्? कस्य खड्गः? को गृहं गतः? को वनं गतः? को नगरं गतः?

षष्ठः पाठः.

या जनकस्य पुत्री सा सीता । जनकपुत्री सीता ।

या रामस्य भार्या सा सीता । रामभार्या सीता ।

या लक्ष्मणस्य भार्या सा ऊर्मिला । लक्ष्मणभार्या ऊर्मिला ।

या रावणस्य पुरी सा लङ्का । रावणपुरी लङ्का ।

यत् दशरथस्य नगरं तत् अयोध्यापत्तनम् ।

यत् रामस्य पुस्तकं तत् लक्ष्मणस्य हस्तेऽस्ति।
यस्मिन् वने रामो गतः तत्र राक्षसाः सन्ति ।
यं रामो हतवान् स राक्षसः ।
यो जनको राजा तस्य पुत्री सीता ।
यो वसिष्ठो नाम ब्राह्मणः स दशरथस्य पुरोहितः ।
यो याज्ञवल्क्यो नाम ब्राह्मणः स जनकस्य पुरोहितः ।

सप्तमः पाठः.

पुरुषः गतः	ಪುರುಷನು ಹೋದನು.
पुरुषः गतवान्	ಪುರುಷನು ಹೋದನು.
नारी गता	ಹೆಂಗಸು ಹೋದಳು.
नारी गतवती	ಹೆಂಗಸು ಹೋದಳು.
बलं गतम्	ಬಲವು ಹೋಯಿತು.
बलं गतवत्	ಬಲವು ಹೋಯಿತು.
कुम्भकारेण घटः कृतः	ಕುಂಬಾರನಿಂದ ಗಡಿಗೆಯು ಮಾಡಲ್ಪಟ್ಟಿತು.
कुम्भकारो घटं कृतवान्	ಕುಂಬಾರನು ಗಡಿಗೆಯನ್ನು ಮಾಡಿದನು
तन्तुवायेन वस्त्रं कृतम्	ನೆಯ್ಗೆಯುವನಿಂದ ಬಟ್ಟೆಯು ಮಾಡಲ್ಪಟ್ಟಿತು.
तन्तुवायो वस्त्रं कृतवान्	ನೆಯ್ಗೆಯುವನು ಬಟ್ಟೆಯನ್ನು ಮಾಡಿದನು.
रामेण रावणो हतः	ರಾಮನಿಂದ ರಾವಣನು ಕೊಲ್ಲಲ್ಪಟ್ಟನು.
रामो रावणं हतवान्	ರಾಮನು ರಾವಣನನ್ನು ಕೊಂದನು.
को गतः ? को गतवान् ?	ಯಾವ ಮನುಷ್ಯನು ಹೋದನು ?

का गता? का गतवती?	ಯಾವ ಸ್ತ್ರೀಯು ಹೋದಳು?
किं गतम्? किं गतवत्?	ಯಾವುದು ಹೋಯಿತು?
केन कः कृतः?	ಯಾವನಿಂದ ಯಾವುದು ಮಾಡಲ್ಪಟ್ಟಿತು?
कः कं कृतवान्?	ಯಾವನು ಏನನ್ನು ಮಾಡಿದನು?
केन किं कृतम्?	ಯಾವನಿಂದ ಯಾವುದು ಮಾಡಲ್ಪಟ್ಟಿತು?
कः किं कृतवान्?	ಯಾವನು ಏನನ್ನು ಮಾಡಿದನು?
केन कः हतः?	ಯಾವನಿಂದ ಯಾವನು ಕೊಲ್ಲಲ್ಪಟ್ಟನು?
कः कं हतवान्?	ಯಾವನು ಯಾವನನ್ನು ಕೊಂದನು?

अष्टमः पाठः.

ವ್ಯಾಕರಣವಿಷಯುಗಳು.

ಸಂಸ್ಕೃತದಲ್ಲಿ ಕನ್ನಡದಲ್ಲಿರುವಂತೆ ಕ್ರಿಯಾಪದವು, ನಾಮಪದವು, ವಿಶೇಷಣ ಪದವು, ಇರುವುದು.

अस्ति, भवति, गच्छति ಮೊದಲಾದವುಗಳು ಕ್ರಿಯಾಪದಗಳು.

रामः, पुरुषः, नारी ಮೊದಲಾದವುಗಳು ನಾಮವಾಚಕಗಳು.

नीलं, शुक्लं, रक्तं ಮೊದಲಾದವುಗಳು ವಿಶೇಷಣಗಳು.

ಯಾವಶಬ್ದಕ್ಕೆ "ತಿ" "ಸಿ" "ನ್ತಿ" ಮೊದಲಾದ ಪ್ರತ್ಯಯುಗಳನ್ನು ಸೇರಿಸಿದರೆ ಕ್ರಿಯಾಪದಗಳಾಗುವವೊ ಆ ಶಬ್ದಕ್ಕೆ ಧಾತುವೆಂದು ಹೆಸರು. ಧಾತುವು ಸಕರ್ಮಕ ಅಥವಾ ಅಕರ್ಮಕವಾಗಿರುವುದು.

अत्र पुरुषोऽस्ति= ಇಲ್ಲಿ ಮನುಷ್ಯನು ಇರುವನು.

पुरुषो मां पश्यति = ಮನುಷ್ಯನು ನನ್ನನ್ನು ನೋಡುತ್ತಾನೆ.

अस्ति = ಇರುತ್ತಾನೆ, ಇರುತ್ತದೆ, ಇರುತ್ತಾಳೆ. **अस्** ಎಂಬ ಧಾತುವು ಅಕರ್ಮಕವು—ಎಂದರೆ ಕರ್ಮವಿಲ್ಲದ್ದು ಎಂದರ್ಥ.

पश्यति = ನೋಡುತ್ತಾನೆ, ನೋಡುತ್ತದೆ, ನೋಡುತ್ತಾಳೆ. **प-श्यति** ಎಂಬುವುದು ಸಕರ್ಮಕ ಕ್ರಿಯಾಪದ—ಎಂದರೆ ಕರ್ಮವುಳ್ಳದ್ದು ಎಂದರ್ಥ.

ಪ್ರಶ್ನೆಮಾಡಿ ಕ್ರಿಯಾಪದವು ಅಕರ್ಮಕವೇ ಅಥವಾ ಸಕರ್ಮಕವೇ ಎಂಬುದನ್ನು ಸುಲಭವಾಗಿ ತಿಳಿಯಬಹುದು. ಹೇಗೆಂದರೆ:—

कोऽस्ति ? ಯಾವನು ಇರುತ್ತಾನೆ? ಈ ವಾಕ್ಯದಲ್ಲಿ "ಯಾರನ್ನು" "ಯಾವುದನ್ನು" ಎಂದು ಪ್ರಶ್ನೆಯುಂಟಾಗುವುದಿಲ್ಲ.

पुरुषः कं पश्यति ? ಮನುಷ್ಯನು ಯಾವನನ್ನು ನೋಡುತ್ತಾನೆ? ಈ ವಾಕ್ಯದಲ್ಲಿ "ಯಾವನನ್ನು" ಎಂದು ಪ್ರಶ್ನೆಯುಂಟಾಗುವುದರಿಂದ, ಆ ಪ್ರಶ್ನೆಗೆ **मां** "ನನ್ನನ್ನು" ಎಂದು ಉತ್ತರವುಕೊಡಲ್ಪಡುವುದು. ಆದ್ದರಿಂದ **मां** ಎಂಬುದು **पश्यति** ಎಂಬ ಪದದಿಂದ ತೋರಿಸಲ್ಪಟ್ಟ "ನೋಡು" ಕ್ರಿಯೆಗೆ ಕರ್ಮವಾಗಿರುವುದು.

ತಿಙನ್ತ ಕ್ರಿಯಾಪದಗಳಿಗೆ ಬದಲಾಗಿ ಧಾತುಗಳ **क्त** ಪ್ರತ್ಯಯಾಂತಗಳನ್ನಾಗಲೀ ಅಥವಾ **क्तवतु** ಪ್ರತ್ಯಯಾಂತಗಳನ್ನಾಗಲೀ ಪ್ರಯೋಗಿಸಬಹುದು.

रामो गच्छति = रामो गतः = रामो गतवान्

कुंभकारेण घटः क्रियते = { **कुंभकारेण घटः कृतः** / **कुंभकारो घटं कृतवान्** }

ಸಂಸ್ಕೃತದಲ್ಲಿ ತಿಙಂತ ಪದಗಳನ್ನು ತಿಳಿಯುವುದು ಸುಲಭವಲ್ಲ. ಆದ್ದರಿಂದ **क्त** ಪ್ರತ್ಯಯಾಂತಗಳನ್ನೂ, **क्तवतु** ಪ್ರತ್ಯಯಾಂತಗಳನ್ನೂ ಮಾಡುವ ಕ್ರಮವನ್ನು ತಿಳಿದು ವಾಕ್ಯಗಳನ್ನು ಸುಲಭವಾಗಿ ಮಾಡಬಹುದು. **क्त**

ಪ್ರತ್ಯಯದಲ್ಲಿ त ಎಂಬುವುದು ನಿಲ್ಲುವುದು. **क्तवतु** ಎಂಬ ಪ್ರತ್ಯಯದಲ್ಲಿ **तवत्** ಎಂಬುವುದು ನಿಲ್ಲುವುದು.

ಉದಾಹರಣೆಗಳು.

कृ (ಮಾಡು) ಎಂಬ ಧಾತು. ಇದಕ್ಕೆ **त** ಎಂಬುದನ್ನು ಸೇರಿಸಿದರೆ **कृत** ಎಂದು ರೂಪವಾಗುವುದು.

कृ+त=कृत. ಲಿಂಗತ್ರಯದಲ್ಲಿಯೂ, **कृतः, कृता, कृतम्.**

कृ+तवत्=कृतवत्. ಲಿಂಗತ್ರಯದಲ್ಲಿಯೂ **कृतवान्, कृतवती, कृतवत्.** ಇದರಂತೆಯೇ —

हृ (ಅಪಹರಿಸು)**+त=हृत. हृतः, हृता, हृतम्.**

हृ (ಅಪಹರಿಸು)**+तवत्=हृतवत्. हृतवान्, हृतवती, हृतवत्.**

श्रु (ಕೇಳು)**+त=श्रुत. श्रुतः, श्रुता, श्रुतम्.**

श्रु (ಕೇಳು)**+तवत्=श्रुतवत्. श्रुतवान्, श्रुतवती, श्रुतवत्.**

श्रि (ಆಶ್ರಯಿಸು)**+त=श्रित. श्रितः, श्रिता, श्रितम्.**

श्रि (ಆಶ್ರಯಿಸು)**+तवत्=श्रितवत्. श्रितवान्, श्रितवती, श्रितवत्.**

मृ (ಸಾಯು)**+त=मृत. मृतः, मृता, मृतम्.**

मृ (ಸಾಯು)**+तवत्=मृतवत्. मृतवान्, मृतवती, मृतवत्.**

भू (ಇರು)**+त=भूत**	**भू+तवत्=भूतवत्**
सू (ಹೆರು)**+त=सूत**	**सू+तवत्=सूतवत्**
नी (ಒಯ್ಯು)**+त=नीत**	**नी+तवत्=नीतवत्**
गम् (ಹೋಗು)**+त=गत**	**गम्+तवत्=गतवत्**
नम् (ಬಗ್ಗು)**+त=नत**	**नम्+तवत्=नतवत्**

हन् (ಕೊಲ್ಲು)+त=हत　　हन्+तवत्=हतवत्

दृश् (ನೋಡು)+त=दृष्ट　　दृश्+तवत्=दृष्टवत्

हृष् (ಸಂತೋಷಪಡು)+त=हृष्ट　　हृष्+तवत्=हृष्टवत्

तुष् (ಸಂತೋಷಪಡು)+त=तुष्ट　　तुष्+तवत्=तुष्टवत्

ಕೆಲವು ಧಾತುಗಳಿಗೆ " क्त " ಪ್ರತ್ಯಯದಹಿಂದೆ ಇಕಾರಾಗಮವು ಬರುವುದು.

भण् (ಹೇಳು)+त=भणित　　भण्+तवत्=भणितवत्

गद् (ಹೇಳು)+त=गदित　　गद्+तवत्=गदितवत्

कथ् (ಹೇಳು)+त=कथित　　कथ्+तवत्=कथितवत्

श्लाघ् (ಶ್ಲಾಘಿಸು)+त=श्लाघित　　श्लाघ्+तवत्=श्लाघितवत्

भक्ष् (ಊಟಮಾಡು)+त=भक्षित　　भक्ष्+तवत्=भक्षितवत्

नवमः पाठः.

पुरुषो गतः । पुरुषो गतवान्=ಪುರುಷನು ಹೋದನು

त्वं गतः । त्वं गतवान्=ನೀನು ಹೋದೆ.

अहं गतः । अहं गतवान्=ನಾನು ಹೋದೆನು.

तौ गतौ । तौ गतवन्तौ=ಅವರಿಬ್ಬರು ಹೋದರು.

युवां गतौ । युवां गतवन्तौ=ನೀವಿಬ್ಬರು ಹೋದಿರಿ.

आवां गतौ । आवां गतवन्तौ=ನಾವಿಬ್ಬರು ಹೋದೆವು.

ते गताः । ते गतवन्तः=ಅವರು ಹೋದರು.

यूयं गताः । यूयं गतवन्तः=ನೀವು ಹೋದಿರಿ.

पुरुषेण फलं भक्षितम्=ಪುರುಷನಿಂದ ಫಲವು ಭಕ್ಷಿಸಲ್ಪಟ್ಟಿತು.

पुरुषः फलं भक्षितवान्=ಪುರುಷನು ಫಲವನ್ನು ಭಕ್ಷಿಸಿದನು.

तेन वाक्यं गदितम्=ಅವನಿಂದ ವಾಕ್ಯವು ಹೇಳಲ್ಪಟ್ಟಿತು.

सः वाक्यं गदितवान्=ಅವನು ವಾಕ್ಯವನ್ನು ಹೇಳಿದನು.

कुम्भकारेण घटः कृतः=ಕುಂಬಾರನಿಂದ ಗಡಿಗೆಯು ಮಾಡಲ್ಪಟ್ಟಿತು. ಕರ್ತರಿಪ್ರಯೋಗದಲ್ಲಿದ್ದ ಕರ್ತೃಪದವು ತೃತೀಯಾಂತದಲ್ಲಿಯೂ, ಕರ್ಮಪದವು ಪ್ರಥಮಾಂತದಲ್ಲಿಯೂ, ಇಲ್ಲಿ ಉಪಯೋಗಿಸಲ್ಪಟ್ಟಿರುವುದರಿಂದ ಇದನ್ನು "ಕರ್ಮಣಿ ಪ್ರಯೋಗ" ವೆಂದು ಹೇಳುವರು.

कुम्भकारः घटं कृतवान्=ಕುಂಬಾರನು ಗಡಿಗೆಯನ್ನು ಮಾಡಿದನು. ಇಲ್ಲಿ ಪ್ರಥಮಾಂತದಲ್ಲಿ ಕರ್ತೃವೂ, ದ್ವಿತೀಯಾಂತದಲ್ಲಿ ಕರ್ಮವೂ, ಇರುವುದರಿಂದ ಇದನ್ನು "ಕರ್ತರಿ ಪ್ರಯೋಗ" ವೆಂದು ಹೇಳುವರು.

(1) ಸಕರ್ಮಕಧಾತುಗಳ **क्त** ಪ್ರತ್ಯಯಾಂತವು ಕರ್ಮಣಿ ಪ್ರಯೋಗದಲ್ಲಿ ಪ್ರಯೋಗಿಸಲ್ಪಡುವುದು.

(2) **क्तवतु** ಪ್ರತ್ಯಯಾಂತಗಳು ಯಾವ ಧಾತುಗಳಿಂದುಂಟಾದಾಗ್ಯೂ ಕರ್ತರಿ ಪ್ರಯೋಗದಲ್ಲಿಯೇ ಪ್ರಯೋಗಿಸಲ್ಪಡುವುವು.

दशमः पाठः.

स स्नातुं गतः=ಅವನು ಸ್ನಾನವನ್ನು ಮಾಡಲು ಹೋದನು.

स भोक्तुं गतः=ಅವನು ಭೋಜನವನ್ನು ಮಾಡಲು ಹೋದನು.

स पठितुं गतः=ಅವನು ಓದಲು ಹೋದನು

ಇಲ್ಲ **स्नातुं, भोक्तुं, पठितुं** ಎಂಬ ಪದಗಳು **तुमुन्** ಪತ್ಯಯಾಂತಗಳು. ಇವುಗಳಂತೆಯೇ—

गदितुं=ಹೇಳುವುದಕ್ಕೆ **हर्तुं**=ಅಪಹರಿಸುವುದಕ್ಕೆ

भणितुं=ಹೇಳುವುದಕ್ಕೆ **हन्तुं**=ಕೊಲ್ಲುವುದಕ್ಕೆ

द्रष्टुं=ನೋಡುವುದಕ್ಕೆ   कर्तुं=ಮಾಡುವುದಕ್ಕೆ

ಎಂಬ ಪದಗಳನ್ನು ತಿಳಿಯಬೇಕು.

एकादशः पाठः.

स स्नात्वा भुक्तवान्=ಅವನು ಸ್ನಾನಮಾಡಿ ಊಟಮಾಡಿದನು.

स पठित्वा गतः=ಅವನು ಓದಿ ಹೋದನು.

स गदित्वा गतः=ಅವನು ಹೇಳಿ ಹೋದನು.

स दृष्ट्वा गतः=ಅವನು ನೋಡಿ ಹೋದನು.

ಇಲ್ಲಿ स्नात्वा, पठित्वा, गदित्वा, दृष्ट्वा, ಎಂಬ ಪದಗಳು क्त्वा ಪ್ರತ್ಯಯಾಂತಗಳು. ಇವುಗಳಂತೆಯೇ—

हृत्वा = ಅಪಹರಿಸಿ   गत्वा = ಹೋಗಿ   हत्वा = ಕೊಂದು

नत्वा = ಬಗ್ಗಿ   श्रुत्वा = ಕೇಳಿ

ಮೊದಲಾದ ಪದಗಳನ್ನು ತಿಳಿಯಬೇಕು.

संस्कृतप्रथमपुस्तकम्

द्वितीयो भागः.

द्वादशः पाठः.

राजगृहनगरे गोपनामा श्रेष्ठी अस्ति। तेन शिलाफलकचितं गृहं निर्मितम्। तत्र स्वार्जितं प्रभूतंसुवर्णं लोहपेटिकासु निक्षिप्य तेन रक्षितम्। कश्चन चोरः तत्सुवर्णं चोरयितुं चोरेणान्येन समं भित्तौ रन्ध्रं कृतवान्। ततः अन्तःप्रवेशाय प्रथमं स्वपादौ रन्ध्रे प्रवेशयामास। जागरूको गृहस्वामी तस्य पादौ गृहीत्वा तं आचकर्ष। बहिष्ठः अन्यश्चोरः तस्य शिरो गृहीत्वा तं आचकर्ष। एवमुभाभ्यामप्याकृष्यमाणस्स चोरो विलपन्नेव मृतः.

१. गोपनामा श्रेष्ठी कुत्रास्ति? तेन किं कृतम्? तेन सुवर्णं कुत्र निक्षिप्तम्? कुत्र वा तद्रक्षितम्? चोरः किं कृतवान्? चोरेण पादयोरन्तःप्रवेशितयोः गृहस्वामी किं कृतवान्? बहिष्ठश्चोरस्तदा किं कृतवान्? स चोरः कामवस्थां प्राप्तः?

२. गोपनामा, श्रेष्ठी, भित्तौ, स्वामी, शिरः, विलपन्—एतेषां सप्तस्वपि विभक्तिषु रूपाणि वदत.

३. शिलानां फलकैश्चितम्, गृहस्य स्वामी, स्वस्य पादौ, स्वेन आर्जितम्, प्रभूतं सुवर्णम्, स्वार्जितं सुवर्णम्— एतेषां समस्तपदानि वदत.

त्रयोदशः पाठः.

कौशाम्बीनगरे धनदत्तनामा श्रेष्ठी अस्ति । तस्य प्रभूतं धनमस्ति । कश्चन चोरः तस्य मन्दिरस्य भित्तौ रन्ध्रं कृतवान् । ततस्सः अन्तः प्रविश्य द्रव्यं नीत्वा स्वगृहं गतः । स प्रत्यूषे "के किं वदन्ति?" इति वार्ताश्रवणाय तद्गृहसमीपं गतः । लोकास्तु तत्र इत्थं वदन्ति— "कथमत्र अल्पीयसि रन्ध्रे चोरः प्रविष्टो निर्गतोवा" इति । स चोरः लोकवाक्यं श्रुत्वा स्वकटीं विलोकितवान् । "अयमेव चोरः" इति ज्ञात्वा राजपुरुषैःगृहीतः दण्डितश्च ।

१. धनदत्तनामा श्रेष्ठी कुत्रास्ति? तस्य किमस्ति? चोरः किं कृतवान्? जनाः किं अवदन्? वार्ताश्रवणानन्तरं चोरः किं कृतवान्? राजपुरुषैः किं कृतम्?

२. धनदत्तनामा, भित्तौ, के, अल्पीयसि, विलोकितवान्, अयम्—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. कौशाम्बी इति नगरम्, स्वस्य गृहम्, वार्तायाः श्रवणम्, गृहस्य समीपम्, लोकस्य वाक्यम्, राज्ञः पुरुषाः, स्वस्य कटी—एतेषां समस्तपदानि वदत.

चतुर्दशः पाठः.

पाटलीपुरे धर्मदत्तनामा वणिक् हट्टे क्रयविक्रयं करोति। एकदा एका आभीरी तत्र हट्टे आगता। तया भणितं- "भोः रूप्यकद्वयस्य मे शर्करां देहि" इति। तेनोक्तं— "यच्छामि" इति। दत्तं तया रूप्यकद्वयम्। तेन वणिजा एकस्यैव रूप्यकस्य शर्करां वारद्वयं तोलयित्वा, शर्करा दत्ता। "रूप्यकद्वयस्यापि शर्करा दत्ता" इति सा जानाति। वञ्चिता च सा। तस्यां गतायां स चिन्तयति—"एतद्रूप्यकं मया अनायासेन लब्धम्। ततोऽहमेव तदुपभुंजामि" इति। तस्य रूप्यकस्य घृतखण्डादि नीत्वा स्वगृहमानीय भार्यां स कथयति—"अद्य घृतपूरान् कुरु" इति। तया घृतपूराः कृताः। तावता तद्गृहे समित्रो जामाता समायातः। तस्यैव तया घृतपूराः परिवेषिताः। समित्रेण तेन भक्षिताश्च। गतस्समित्रो जामाता। वणिक् गृहे समायातः। स्नानं कृत्वा भोजनार्थं समुपविष्टः। तया स्वाभाविकमेव भोजनं परिवेषितम्। वणिग्वदति—"कथं न कृता घृतपूराः?" तया उक्तं—"कृताः। परं आगन्तुकेन समित्रेण जामात्रा भक्षिताः" इति। स चिन्तयति—"मया सा वराकी आभीरी वञ्चिता। अहं वञ्चितो जामात्रा। परार्थमेवायमात्मा पापेन संयोजितः"।

धनदत्तनामा हट्टे किं करोति? तत्र का आगता?

तया किं भणितम्? तेन किमुक्तम्? तया किं दत्तम्? वणिजा कथं शर्करा दत्ता? सा किं जानाति? किं वंचिता सा? तस्यां गतायां स किं चिन्तयति? चिन्तारूपं वद। चिन्तानन्तरं स किं कृतवान्? किमाह स भार्याम्? भार्या किं कृतवती? तदा तस्य गृहे कस्समायातः? भार्यया किं कृतम्? भोजनानन्तरं जामाता किं कृतवान्? गृहमागत्य वणिक् किं कृतवान्? भार्यया किं कृतम्? किं वणिजोक्तम्? तया किमुक्तम्? तेन किं चिन्तितम्? चिन्तारूपं वद।

२. आभीरी, मे, शर्करा, वणिक्, अहं, जामाता, आत्मा—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. रूप्यकस्य द्वयम्, स्वस्य गृहम्, जामात्रा भक्षितम्—एतेषां समस्तपदानि वदत.

४. क्री+त्वा, कृ+त्वा, सृ+त्वा, भू+त्वा, स्ना+त्वा—एतानि "क्त्वा" प्रत्ययान्तानि रूपाणि.

प्रश्नः—किं कृत्वा स गतः?

उत्तरम्—स्नात्वा स गतः।

प्रश्नः—किं कृत्वा स गृहं गतः?

उत्तरम्—घृतखण्डादि क्रीत्वा स गृहं गतः।

पंचदशः पाठः.

एकस्मिन्सरसि द्वौ पुरुषौ स्नातुमागतौ । तयोरेकस्य प्रच्छादनपटस्सौत्रिकोऽस्ति । अपरस्योर्णामयोऽस्ति । पटौ तटे निक्षिप्य तौ युगपत्स्नातुं प्रवृत्तौ । तत ऊर्णामयपटस्य स्वामी सत्वरं स्नात्वा तटमागत्य स्वपटं विमुच्य द्वितीयस्य सौत्रिकं पटं गृहीत्वा गन्तुं प्रस्थितः । द्वितीयः पुरुषस्तु तं दृष्ट्वा करेण गृहीत्वा स्वपटं याचितवान् । स तु न प्रयच्छति । तयो राजकुले व्यवहारो जातः । तत्र कारणिकैः द्वयोरपि शिरसी कङ्कतिकयाऽवलेखिते । अवलेखने कृते सति ऊर्णामयपटस्वामिनश्शिरसः अधस्तात् ऊर्णातन्तवो बहवः पतिताः । ततो ज्ञातं कारणिकैः— "नूनमेष न सौत्रिकपटस्य स्वामी" इति । ततस्स निगृहीतः; अपरस्स्वपटं दापितः ।

१. तौ पुरुषौ किं कर्तुं गतौ ? कुत्र गतौ ? एकस्य पटः कीदृशः ? अन्यस्य कीदृशः पटः ? तौ किं कर्तुं प्रवृत्तौ ? ऊर्णामयपटस्वामी किं कृतवान् ? तदा सौत्रिकपटस्वामी किं कृतवान् ? तयोर्व्यवहारो जातो वा ? कुत्र व्यवहारो जातः ? कारणिकैः किं कृतम् ? ऊर्णामयपटस्वामिनः शिरसि अवलेखिते किमधः पतितम् ? तदा कारणिकैः किं ज्ञातम् ?

२. सरसि, स्वामी, याचितवान्, द्वयोः, शिरसि, एषः, सः—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. प्रच्छादनाय पटः, ऊर्णायाः विकारः, स्वस्य पटः, राज्ञः कुलम्, ऊर्णायाः तन्तवः, सौत्रिकं पटम्—एतेषां समस्तपदानि वदत.

षोडशः पाठः.

कस्यचित्पुरुषस्य पुरीषमुत्सृजतः सरटो गुदं पुच्छेन स्पृशन् कुत्रापि गतः। ततस्तस्य पुरुषस्य "नूनं उदरे सरटः प्रविष्टवान्" इति शंका जाता। ततोऽतीव भीतः स गृहं गत्वा दुर्बलो बभूव। स वैद्यं पप्रच्छ। वैद्यस्तु "शंका निर्मूला" इति जानन्नपि "तस्य सन्देहो निवारणीयः" इति मत्वा "यदि मे रूप्यकाणां शतं प्रयच्छसि, तदा त्वां नीरोगं करिष्यामि" इत्युक्तवान्। तेन पुरुषेण "तथैवास्तु" इति प्रतिपन्नम्। ततो वैद्यस्तस्य विरेचनौषधं दत्वा घटे सरटं प्रक्षिप्य तस्मिन्घटे पुरीषोत्सर्गं कारितवान्। तत्र पुरीषे सरटो दर्शितश्च। तस्य शंका व्यपगता। स निरोगो जातः।

१. पुरीषमुत्सृजतः पुरुषस्य गुदं सरटः किं कृतवान्? तस्य का शंका जाता? ततस्तस्य किमासीत्? स किं चकार? वैद्यः किं चकार? स किमुक्तवान्? तेन पुरुषेण किं कृतम्? वैद्येन किं कृतम्? सरटदर्शनेन तस्य शंका गता वा? शंकापगमनात् स कथंभूतो जातः?

२. उत्सृजतः, स्पृशन्, प्रविष्टवान्, जानन्, कारितवान्—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. रूप्यकाणां शतम्, विरेचनाय औषधम्—एतयोः समस्तपदे वदत.

४. स्पृशत्, स्पृशती, स्पृशन्ति—नपुंसकलिङ्गे.

स्पृशन्, स्पृशन्तौ, स्पृशन्तः—पुल्लिङ्गे.

स्पृशन्ती, स्पृशन्त्यौ, स्पृशन्त्यः—स्त्रीलिङ्गे.

एवमेव गच्छत्, भवत्, जानत्—एतेषां रूपाणि वदत.

सप्तदशः पाठः.

वेन्नातटे एकं नगरमस्ति । तत्र कश्चन सौगतस्समागतः । तत्रैव कश्चन श्वेतांबरो जैनबालकोऽस्ति । स सौगतस्तं बालं पृष्टवान्—“भोः, सर्वज्ञाः किलार्हन्तः । तत्पुत्रकाश्च सर्वज्ञाः । तत्कथय कियन्तोऽत्र नगरे वायसा वसन्ति” इति । ततस्स बालश्चिन्तयामास—“शठोऽयं सौगतः । शाठ्यमेव दर्शयित्वा स जेतव्यः” इति । ततस्स श्लोकमिमम् पठितवान्—

“षष्टिः काकसहस्राणामस्ति वेन्नातटे पुरे ।
न न्यूना नाधिका वाऽपि गणनान्निश्चयं कुरु ॥”

इति । ततस्स भिक्षुः प्रत्युत्तरं दातुमशक्तस्सन् स्वशिरः कण्डूयमानो मौनमाधाय गतः ।

१. नगरं कुत्राऽस्ति? कस्समागतस्तत्र? जैनबालकः कुत्रास्ति? कथंभूतस्स जैनबालकः? सौगतस्तं बालकं किं पृष्टवान्? के सर्वज्ञाः? पुनः के सर्वज्ञाः? बालः किं चिन्तयामास? बालकेन पठितं श्लोकं वद। ततः भिक्षुः किं कृतवान्? किं प्रत्युत्तरं दातुं स शक्तः?

२. पृष्टवान्, अर्हन्तः, यूयम्, पठितवान्, शिरः—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. जैनस्य बालकः, काकानां सहस्राणि, न शक्तः, स्वस्य शिरः—एतेषां समस्तपदानि वदत.

४. दा+तुम्=दातुम्, गम्+तुम्=गन्तुम्, जि+तुम्=जेतुम्, स्ना+तुम्=स्नातुम्—एतानि "तुमन्" प्रत्ययान्तानि रूपाणि.

अष्टादशः पाठः.

वसन्तपुरे भद्रमुखोनाम राजाऽस्ति । स बुद्धिकुशलमेकं मन्त्रिणमन्विच्छन् चतुष्पथे हस्तिनमालानस्तम्भे बन्धयित्वा घोषणामेतामकारयत्—"योऽमुं हस्तिनं तोलयति, तस्मै राजा महतीं वृत्तिं प्रयच्छति" इति । तां घोषणां श्रुत्वा कश्चित्पुरुषः तं हस्तिनं महासरसि नावमारोहयामास ।

तस्मिन् हस्तिनि नावमारूढे यावत्प्रमाणा नौः जले निमग्ना तावत्प्रमाणां रेखां नावि कृतवान्। ततस्समुत्तारितो हस्ती। ततः प्रक्षिप्तानि गण्डशैलानि नावि तावन्ति, यावद्भिस्सा नौः पूर्वकृतरेखापर्यन्तं जले निमग्ना भवति। ततस्तानि शैलानि तोलितानि। तोलनार्थमुपयुक्ता पलसंख्या च ज्ञाता। निवेदितं च राज्ञे—"एतावत्पलप्रमाणो हस्ती वर्तते" इति। ततस्तुष्टो राजा तं पुरुषं मन्त्रिणं चकार।

१. भद्रमुखः कुत्राऽस्ति? स किमकारयत्? किमर्थं हस्तिनमालानस्तम्भे बन्धयामास? घोषणा कीदृशी? तां घोषणां श्रुत्वा पुरुषः किं कृतवान्? सः हस्तिनं नावमारोप्य किं कृतवान्? कुत्र स रेखां कृतवान्? हस्तिनं समुत्तार्य स किं कृतवान्? शैलतोलनया हस्तिभारः ज्ञातो वा? ततो राजा किं कृतवान्?

२. हस्तिनं, राजा, सरसि, नौः, मन्त्रिणम्, अमुम्—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. बुद्ध्या कुशलः, महत् सरः, पूर्वं कृता रेखा, पलानां संख्या—एतेषां समस्तपदानि वदत.

४. यथा पुरुषः हस्तिनं तोलितवान् तथा कर्तुं त्वमपि शक्तोऽसि? यथा त्वं करोषि, तद्वद.

———

एकोनविंशः पाठः

कश्चन राजा मन्त्रिणमेकं गवेषयति । स कस्यचन विस्तीर्णस्य तटाकस्य मध्ये स्तम्भमेकं निक्षिप्य एवं घोषणां करोति—"यः पुरुषोऽत्र तटे स्थितोऽमुं स्तम्भं रज्ज्वा बध्नाति, तस्मै राजा शतसहस्रं प्रयच्छति" इति । एतां घोषणां श्रुत्वा कश्चन पुरुषः तटप्रदेशे कीलकं भूमौ निक्षिप्य रज्ज्वा बद्ध्वा तया रज्ज्वा सह तटाकं परितः सर्वतस्तटे परिभ्रमन् स्तम्भं रज्ज्वा बद्धवान् । तस्य बुद्ध्यतिशयं दृष्ट्वा जनास्तं श्लाघितवन्तः । तुष्टश्च राजा तं मन्त्रिणं चकार ।

१. राजा किं करोति? स किं कृत्वा घोषणां करोति? घोषणा कीदृशी? घोषणां श्रुत्वा पुरुषः किं कृतवान्? किं त्वमपि तथा करोषि? यथा पुरुषेण कृतं तथा कुरु । जनाः किं कृतवन्तः? राजा किं चकार?

२. राजा, मन्त्रिणं, रज्ज्वा, श्लाघितवन्तः—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. विस्तीर्णं तटाकम्, एकं स्तम्भम्, तटस्य प्रदेशः, बुद्धेः अतिशयः, तटाकस्य मध्यम्—एतेषां समस्तपदानि वदत.

४. श्रु+त्वा=श्रुत्वा (पुरुषो गतः), क्षिप्+त्वा=क्षिप्त्वा, दृश्+त्वा=दृष्ट्वा—एतानि "क्त्वा" प्रत्ययान्तानि.

विंशः पाठः.

सिद्धपुरे देवदत्तो नाम ब्राह्मणोऽस्ति। स सुवर्णपणैः पूर्णां भस्त्रामेकां गोपश्रेष्ठिनो हस्ते निक्षिप्य देशान्तरं गतः। प्रभूते काले अतिक्रान्ते निक्षेपग्राही श्रेष्ठी तस्या भस्त्राया जात्यसुवर्णमयान्पणान्गृहीत्वा हीनसुवर्णपणांस्तावत्संख्याकांस्तत्र प्रक्षिप्तवान्। निक्षेपस्वामी देशान्तरादागम्य निक्षेपं याचितवान्। स श्रेष्ठी तं प्रत्यर्पयामास। मुद्रा यथापूर्वमासीत्। मुद्रामुत्पाट्य यावद्देवदत्तः पणान्गणयति तावद्धीनवर्णसुवर्णमयान्पणान्पश्यति। ततस्तयो राजकुले व्यवहारो जातः। देवदत्तो राजकुले कारणिकैः पृष्टः—"कदा त्वया सुवर्णपणपूर्णा भस्त्राऽस्मै दत्ता?" इति। तेनोक्तं—"विंशतिर्वत्सरा गताः" इति। ततः कारणिकैः अभिहितो गोपः—"अमी पणा अधुनातनकालकृताः पुरा नासन्" इति। स मिथ्याभाषी दण्डितः। दापितश्च ब्राह्मणो निजनिक्षेपम्।

१. सिद्धपुरे कोऽस्ति? तस्य नाम किम्? किं कृत्वा स देशान्तरं गतः? गोपश्रेष्ठी किं कृतवान्? ततः निक्षेपस्वामी किं कृतवान्? श्रेष्ठी निक्षेपं प्रत्यर्पितवान् किम्? मुद्रा यथापूर्वमासीत्किम्? देवदत्तः मुद्रामुत्पाट्य किं पश्यति? तयो राजकुले किं जातम्? कारणिकैः देवदत्तः किं पृष्टः? स प्रश्नः कः? देवदत्तेन किमुक्तम्? कारणिकैः गोपः कथं अभिहितः? गोपो दण्डितो वा? निक्षेपः कस्मै दत्तः?

२. श्रेष्ठी, निक्षेपग्राही, क्षिप्तवान्, अस्मै, मिथ्याभाषी—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. सुवर्णस्य पणाः, हीनसुवर्णस्य पणाः, जात्यसुवर्णस्य पणाः, निक्षेपस्य स्वामी, राज्ञः कुलम्, पणैः पूर्णा, अधुनातनः कालः, काले कृताः—एतेषां समस्तपदानि वदत.

एकविंशः पाठः.

पाटलिपुरे द्वौ पुरुषौ स्तः । तौ सुहृदौ स्तः । ताभ्यां क्वचित्प्रदेशे निधिर्दृष्टः । तयोरेको मायावी वदति—"श्वश्शुभे नक्षत्रे निधिं गृहीष्यामः" इति । द्वितीयेन सरलमनस्केन तथैव प्रतिपन्नम् । ततस्स मायावी तत्र रात्रौ गत्वा निधिमपहृत्य तत्रेंगालानि निक्षिप्तवान् । परेद्युः द्वावपि तत्र गतौ । यदा ताभ्यामिंगालानि तत्र दृष्टानि, तदा मायाविनोक्तं—"आवां हीनपुण्यौ ! दैवेन निधिर्दर्शितः । इंगालानि च दत्तानि" इति । शिरस्ताडयित्वा पुनः पुनर्द्वितीयस्य मुखं मायावी पश्यति । ततो द्वितीयेन चिन्तितं—"नूनमनेन निधिरपहृतः" इति । ततोऽनेनोक्तं—"वयस्य, खेदं मा वह । निधिनिमित्तेन न कोऽपि दुःखं वहति" इति । तौ गृहं गतौ ।

ततो मायाविनस्सजीवेव प्रतिमा द्वितीयेन कारिता ।

द्वौ च मर्कटौ गृहे रक्षितौ तेन । प्रतिमायाश्चोत्संगे हस्ते शिरसि स्कन्धयोश्च भक्ष्याणि निक्षिप्य तेन मर्कटौ तत्र मुक्तौ । क्षुधा पीडितौ मर्कटावपि प्रतिमाया अंगेभ्यः भक्ष्याणि गृहीत्वा भक्षितवन्तौ । प्रतिदिनमेव तेन भक्ष्याणि तत्र न्यस्तानि । ताभ्यां च मर्कटाभ्यां तत्र तत्र गत्वा तानि भक्षितानि च । तच्च तयोर्मर्कटयोस्सहजं शीलमासीत् । अन्यदा कस्मिंश्चित्पर्वदिवसे तेन मायाविनः पुत्रौ भोजनाय निमन्त्रितौ । समागतौ च तौ भोजितौ । भोजनानन्तरं तौ महता सुखेनान्यत्र संगोपितौ । ततो मायावी स्वपुत्रौ स्वगृहं नेतुमागतः । द्वितीयस्तमाह—“ मित्र तव पुत्रौ मर्कटावभूताम् ” इति । ततो मायावी गृहमध्ये गतः । मर्कटौ च तं प्रतिमासदृशं दृष्ट्वा किलकिलायमानौ तस्य शिरसि स्कन्धयोरुत्सङ्गे च आरुह्य भक्ष्यान्वेषणं कृतवन्तौ । द्वितीयः प्राह— “ वयस्य, इमावेव तव पुत्रौ । पश्य, इमौ त्वयि प्रीतिं दर्शयतः ” इति । ततस्स मायावी प्राह—“ वयस्य, किं मनुष्यौ मर्कटौ भवतः ? ” इति । स प्राह—“ भवतः प्रारब्धकर्मवशादिदं जातम् । किं सुवर्णमिङ्गालं भवति ? परमाणवोः पुरातनकर्मवशादेतदपि जातम् । तथा तवपुत्रावपीदानीं मर्कटौ जातौ ” इति । ततो मायावी चिन्तयामास— “ नूनमहं ज्ञातोऽनेन । यद्युच्चैश्शब्दं करिष्यामि, तदाहं राजग्राह्यो भविष्यामि । मम पुत्रौ नान्यथा भविष्यतः ” इति ।

ततस्तेन यथावस्थितं सर्वं तस्मै सरलहृदयाय निवेदितम्। दत्तश्च निधेर्भागः। इतरेण च समर्पितौ तस्य पुत्रौ।

१. पाटलिपुरे कौ स्तः? तौ कथंभूतौ? ताभ्यां को दृष्टः? मायावी किं वदति? द्वितीयेन किं कृतम्? ततो मायावी किं कृतवान्? परेद्युः तौ किं कृतवन्तौ? ताभ्यां निधिप्रदेशे कानि दृष्टानि? मायाविना किमुक्तम्? मायावी किं कृत्वा द्वितीयस्य मुखं पश्यति? द्वितीयेन किं चिन्तितम्? किं तेनोक्तम्? ततस्तौ किं कृतवन्तौ? द्वितीयेन का कारिता? तेन कौ रक्षितौ? मर्कटौ कुत्र किं कृत्वा तेन मुक्तौ? मर्कटौ किं कृतवन्तौ? मर्कटयोः किं शीलमासीत्? पर्वदिवसे द्वितीयेन किं कृतम्? किं मायाविनः पुत्रौ समागतौ? समागत्य तौ किं कृतवन्तौ? मायाविनः पुत्रौ कुत्र निक्षिप्तौ? मायावी किं कृतवान्? तदा मर्कटौ किं कृतवन्तौ? द्वितीयः किं प्राह? मायावी किं प्राह? द्वितीयः पुनरपि किं प्राह? मायावी किं चिन्तयामास? निधेर्भागो दत्तः किम्? इतरः किं कृतवान्?

२. सुहृदौ, ताभ्याम्, मायावी, निक्षिप्तवान्, शिरः, अनेन, कः, प्रतिमा, पर्वदिवसः, आवयोः—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. तस्य पुत्रौ, निधेः भागः, सरलं हृदयम्, पुरातनं कर्म, कर्मणः वशः, प्रतिमया सदृशम्, गृहस्य मध्यम्, तस्य

शिरः, प्रतिमाया हस्तः, प्रतिमायाः स्कन्धौ, सरलं मनः, शुभं नक्षत्रम्—एतेषां समस्तपदानि वदत.

४. निधिः अपहृतः, स्त्री अपहृता, वस्त्रं अपहृतम्—एतेषां लिङ्गभेदो दर्शनीयः.

द्वाविंशः पाठः.

पाटलिपुरे कश्चन परिव्राजकोऽस्ति । तस्य हस्ते रूप्यमयमेकं भाजनमस्ति । स च यदेकदा श्रुणोति तत्सर्वं तथैवावधारयति । ततस्स स्वस्यबुद्धिकौशल्यं दर्शयन् प्रतिज्ञामिमां कृतवान्—"यो मामपूर्वं श्रावयति, तस्मै भाजनमिदं ददामि" इति । न कोऽपि तं अपूर्वं श्रावयितुं शक्नोति, यतस्सः यत्किमपि श्रुणोति तत्सर्वमस्खलितं तथैवानुवदति । ततस्स वदति चेत्थं—"इदं मया पूर्वमेव श्रुतम् । कथमन्यथाऽहमस्खलितं भणामि" इति । एतत्सर्वत्र विख्यातमभूत् । ततः केनापि सिद्धपुरुषेण प्रोक्तं—"अहमपूर्वं श्रावयिष्यामि" इति । ततस्तत्र बहवो जनास्समायाताः । ततस्सिद्धपुरुषेण पठितोऽयं श्लोकः—

"पित्रा ते मे पितुर्हस्ताद्भाजनं स्वीकृतं पुरा ।
यदि श्रुतं त्वया मह्यं देहि तद्भाजनं द्रुतम् ॥"

ततस्स परिव्राजकस्तूष्णीं स्थितः । "जितः परिव्राजकः" इति जना अवदन् ।

१. परिव्राजकः कुत्रास्ति? तस्य हस्ते किमस्ति? तस्य बुद्धिकौशल्यं कीदृशम्? स किं कृतवान्? तस्य प्रतिज्ञा का? श्रुतं सर्वं स कथमनुवदति? सिद्धपुरुषेण किं कृतम्? तेन कश्श्लोकः पठितः? स परिव्राजकः किमर्थं तूष्णीं स्थितः? जनाः किमवदन्?

२. अयं, कः, कृतवान्, अहं, त्वया—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. बुद्धेः कौशल्यम्, न पूर्वम्, तव पिता, सिद्धः पुरुषः—एतेषां समस्तपदानि वदत.

४. श्रुणोति, अवधारयति, श्रावयति, भणामि, अस्ति, अवदन्—एतेषां पुरुषत्रयेऽपि रूपाणि वदत.

त्रयोविंशः पाठः.

मणिपुरे स्थूलभद्रो नाम वणिगस्ति। तस्य प्रभूतं धनं कुसीदार्थं दत्तमस्ति। अन्यदा स मृतः। तस्य भार्या वृद्धिप्रयुक्तं धनं जनेभ्यो न लभते। ततस्सा पतिमित्रं भणितवती—“मम पत्युरधमर्णेभ्यः धनसंग्रहं कुरु” इति। तेनोक्तं—“यदि ममापि भागं प्रयच्छसि, तदा तथा करोमि” इति। तयोक्तं—“यदिच्छसि तन्मह्यं देहि” इति। ततस्तेन जनेभ्यस्सर्वं धनं उद्ग्राहितम्। स तस्यै स्तोकं प्रयच्छति। सा

नेच्छति तदादातुम् । ततस्तयोः राजकुले व्यवहारो जातः । यदुद्ग्राहितं द्रव्यं तत्सर्वं कारणिकैः आनायितम् । तस्य धनस्य द्वौ भागौ कृतौ । एको महान् । द्वितीयोऽल्पः । स पुरुषः कारणिकैः पृष्टः—"कं भागं त्वमिच्छसि" इति । स प्राह—"महान्तं भागं इच्छामि" इति । ततस्तैः कारणिकैः "यदिच्छसि तन्मह्यं देहि" इति तया उक्तस्य वाक्यस्याक्षरार्थो विचारितः । तैरुक्तं—"हे पुरुष, त्वं महान्तं भागं इच्छसि । अतस्त्वया महान्भागस्तस्यै देयः" इति । महान् भागः तस्यै दत्तः.

१. स्थूलभद्रः कुत्रास्ति? तस्य धनं किमर्थं दत्तमस्ति? तस्मिन्मृते वृद्धिप्रयुक्तं धनं तस्य भार्या लभते किम्? सा पतिमित्रं किं भणितवती? किं तेनोक्तम्? किं तयोक्तम्? तस्या वाक्यं वद । ततस्तेन किं कृतम्? धनं गृहीत्वा स किं करोति? सा किं स्तोकमादातुमिच्छति? तयोः व्यवहारो जातः किम्? कुत्र व्यवहारो जातः? कारणिकैः किं कृतम्? कारणिकैः स पुरुषः कथं पृष्टः? स किमाह? ततः कारणिकैः अर्थो विचारितः किम्? कस्यार्थो विचारितः? तैः किमुक्तम्?

२. वणिक्, मित्रं, तेन, तस्यै, महान्, मह्यं, त्वया—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. कुसीदाय=कुसीदार्थम्, धनाय=धनार्थम्.

४. वृद्ध्यै प्रयुक्तम्, पत्युः मित्रम्, धनस्य संग्रहः, महान् भागः, वाक्यस्य अर्थः—एतेषां समस्तपदानिवदत.

चत्वारिंशः पाठः.

एकस्याचार्यस्य क्षुल्लकोऽविनीतश्शिष्यः। तं आचार्यः शिक्षार्थं वाचा ताडयति। स क्षुल्लको रोषं वहति। अन्यदा आचार्यस्तेन क्षुल्लकेन समं सिद्धशैलं वन्दितुं गतः। तत उत्तरतः आचार्यस्य वधाय तेन पृष्ठस्थितेन क्षुल्लकेन शिला मुक्ता। आयान्ती शिला आचार्येण दृष्टा; स्वपादौ प्रसार्य निवारिता च। अन्यथा सः आचार्यो मृतोऽभविष्यत्। आचार्येण शापोऽस्मै क्षुल्लकाय दत्तः—"हे दुरात्मन्, त्वं स्त्रीतो नाशं गमिष्यसि" इति। अथ स क्षुल्लकः "आचार्योऽयं मिथ्यावादी भवतु" इति विचिन्त्य पृथग्भूतः तापसाश्रमं गत्वा तिष्ठति। तत्र आसन्ननदीकूले तपः करोति। मार्गसमीपे सार्थं विलोकयति। यदि शुद्धं प्राप्नोति तदा आहारं गृह्णाति। नोचेत्तदा तपः करोति। लोकैस्तस्य कूलवालक इति नाम कृतम्[1]।

१. शिष्यः कीदृशः? तमाचार्यः ताडयति वा? कया ताडयति? क्षुल्लकः कं वहति? आचार्यस्तेन सह कुत्र गतः? किं कर्तुं तत्र गतः? तेन शिष्येण का मुक्ता? किमर्थं मुक्ता

---

[1] उत्तराध्ययनसूत्र. प. 10.

शिला? शिला कथं निवारिता आचार्येण? अन्यथा स आचार्यः कथं भवेत्? कीदृशश्शापो दत्तस्तस्मै गुरुणा? शिष्यः किं चिन्तितवान्? स कुत्र गत्वा तिष्ठति? किं करोति सः? कं स विलोकयति? आहारं स कदा गृह्णाति? जनैस्तस्य कीदृशं नाम कृतम्?

२. वाचा, तेन, आयान्ती, अस्मै, तपः—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. अविनीतः शिष्यः, न विनीतः, आचार्यस्य वधाय, स्वस्य पादौ, तापसानां आश्रमः, मार्गस्य समीपः, कूले बालकः—एतेषां समस्तपदानि वदत.

पंचविंशः पाठः.

कस्यचित्कुलपुत्रस्य भ्राता वैरिणा व्यापादितः। अन्यदा कुलपुत्रो जनन्या भणितः। "पुत्र त्वद्भ्रातृघातुकं वैरिणं घातय"। ततः स वैरी तेन कुलपुत्रेण निजबलात् जीवग्राहं गृहीत्वा जननीसमीपे आनीतः। भणितश्च "अरे भ्रातृघातुक! अनेन खड्गेन त्वामहं क्व हन्मि?"। तेनापि प्रचण्डं दृष्ट्वा भयभीतेन भणितं—"यत्र शरणागता न हन्यन्ते"। एतद्वचः श्रुत्वा कुलपुत्रेण जननीमुखमवलोकितम्। जनन्या च सत्व-मवलम्ब्य उत्पन्नकरुणया भणितं—"हे पुत्र, शरणागता न हन्यन्ते"। तेन कुलपुत्रेण भणितं—"कथं रोषं सफलीक-

रोमि"? जनन्या उक्तं—"वत्स सर्वत्र न रोषः सफली-क्रियते"। जननीवचनात् स तेन मुक्तः। तयोश्चरणेषु पतित्वा स गतः। एवं क्रोधमसत्यं कुर्यात्[1]।

१. भ्राता केन व्यापादितः? कुलपुत्रः जनन्या कथं भणितः? वैरी तेन कथमानीतः? कथं भणितश्च? वैरिणा किं भणितम्? तद्वचः श्रुत्वा कुलपुत्रेण किं कृतम्? जनन्या किमुक्तम्? ततः कुलपुत्रेण किं भणितम्? जनन्या किमुक्तम्? मुक्तो वैरी किं कृतवान्?

२. भ्राता, वैरिणा, जनन्या, त्वां, अहं—एतेषां सप्तसु विभक्तिषु रूपाणि वदत.

३. कुलपुत्रस्य भ्राता, भ्रातुः घातुकः, भयेन भीतः, तस्य वचः, जनन्याः मुखम्, जनन्याः वचनम्—एतेषां समस्तपदानि वदत.

४. वैरिणा पुत्रो व्यापादितः, वैरी पुत्रं व्यापादितवान्; स तेन मुक्तः, स तं मुक्तवान्—उपाध्यायेन क्तान्त, क्तवत्वन्तयोर्भेदो विद्यार्थिभ्यः प्रदर्शनीयः.

षड्विंशः पाठः.

वीतभयपत्तने एकदा महदशिवमुत्पन्नम्। त्रयो मान्त्रिकास्तत्रायाताः। राज्ञः पुरतस्तैः कथितं—"वयमशिवं उप-

[1] उ. सू. प. 18.

शमयिष्यामः"। राज्ञा भणितं—"केन प्रकारेण?"। तेषां मध्ये एकेनोक्तं—"मन्त्रसिद्धं ममैकं भूतमस्ति। तदत्यन्तं रूपवत् गोपुररथ्यादिषु भ्रमद्यः पश्यति स म्रियते। यस्त-द्दृष्ट्वाऽधोमुखस्स्यात् स सर्वरोगैर्मुच्यते"। राज्ञा भणितं—"अलमनेनातिरोषणेन भूतेन"। अथ द्वितीयेन मान्त्रिके-णोक्तं—"मम भूतं महाकायं लम्बोदरं विस्तीर्णकुक्षि पञ्च-शीर्षं एकपादं विकृतरूपं अट्टहासं कुर्वत् दृष्ट्वा यो हसति तस्य शिरः सप्तधा स्फुटति। यस्तु तद्भूतं धूपपुष्पस्तुत्यादिभिः पूजयति स सर्वरोगैर्मुच्यते"। राज्ञोक्तं—"अनेनापि भूतेन कृतम्"। अथ तृतीयेन मान्त्रिकेणोक्तं—"ममाप्येवंविधं भूतमस्ति। परं प्रियाप्रियकारिणं जनं दर्शनादेव रोगेभ्यो मोचयति"। राज्ञोक्तं—"एवं भवतु"। तथा तन्नगराशिव-मुपशान्तम्[1]।

१. वीतभयपत्तने किमुत्पन्नम्? के तत्रायाताः? राज्ञः पुरतस्तैः किं कथितम्? किं राज्ञा भणितम्? तेष्वेकेन किमुक्तम्? तस्य वाक्यं वद। राज्ञा किं भणितम्? द्वितीयेन किमुक्तम्? तस्य वाक्यं वद। राज्ञा किमुक्तम्? तृतीयेन किमुक्तम्? तस्य वाक्यं वद। राजा किमाह?

२. महत्, राज्ञः, तैः, वयम्, रूपवत्, भ्रमत्, अनेन, कुर्वत्, शिरः, प्रियकारिणम्—एतेषां सप्तविभक्तिषु रूपाणि वदत.

---

[1] उ. सू. प. 19.

३. महत् अशिवम्, न शिवम्, मन्त्रेण सिद्धम्, सर्वे रोगाः, तस्य शिरः, नगरस्य अशिवम्, प्रियं अप्रियम्, न प्रियम्—एतेषां समस्तपदानि वदत.

४. तैः कथितम्=ते कथितवन्तः.

राज्ञा भणितम्, राज्ञा उक्तम्, एकेन उक्तम्—क्तान्तमपहाय क्तवत्वन्तप्रयोगेण वाक्यानि वदत.

सप्तविंशः पाठः.

एकस्यां पल्ल्यां द्वौ भ्रातरौ तस्करनायकौ स्तः। सार्थेन सह गच्छतां साधूनां वर्षाः ऋतुः प्राप्तः। न च तत्र कोऽपि साधुभक्तोऽस्ति। तेन साधवस्तस्करनायकयोस्समीपे गताः। साधुदर्शनेन तौ चोरनायकौ आनन्दितौ तान्प्रणम्य कथयतः—"किं प्रयोजनं भवताम्" साधुभिर्भणितं—"अस्माकं वर्षासु विहर्तुं न कल्पते। ततो वर्षावासयोग्यं उपाश्रयं प्रार्थयामः"। ताभ्यां च सहर्षं साधूनामुपाश्रयो दत्तः। तत्र विश्वस्तास्तिष्ठन्ति साधवः। चोरनायकाभ्यां भणितं—"अस्माकं गृहेषु सम्पूर्णं भक्तादि गृहीतव्यम्"। साधुभिर्भणितं—"न कल्पते एकस्मिन्गृहे पिण्डग्रहणं साधूनाम्। ततः सर्वेषु उचितगृहेषु विहरिष्यामः। उपाश्रयदानेनैव भवतां महापुण्यसम्बन्धो जातः"। इदं साधुवचः श्रुत्वा तौ अत्यन्तपरितुष्टौ तान् साधून् उपद्रवात् रक्षतः। विश्रा-

मणादिभक्तिं च कुरुतः। सुखेन साधूनां वर्षाकालोऽतिक्रान्तः। गच्छद्भिस्साधुभिस्तयोश्चोरनायकयोः अन्यव्रतग्रहणासमर्थयोर्निशाभोजननियमो दत्तः। तयोरेवमुपदिष्टं—"अस्मिन्दृढव्रते दृढप्रयत्नैर्भवितव्यं" इति। इति भणित्वा गतास्साधवः। तावपि चोरनायकौ सपरिवारौ कियन्मार्गमनुगम्य निवृत्तौ। मुनिसेवया कृतार्थत्वं मन्यमानौ तिष्ठतः। अन्यदा ताभ्यां धाटीगताभ्यां बहु गोमहिषमानीतम्। अन्तरालमार्गे तत्परिवारपुरुषैः कैश्चिन्महिषो व्यापादितः। तद्भोजनाय सपरिवारौ तौ तत्र स्थितौ। केचित्परिवारपुरुषाः मद्यानयनार्थं ग्राममध्ये गताः। महिषव्यापादकैः परस्परमातिविमृष्टं—"मांसार्धे विषं प्रक्षिप्य ग्राममध्ये गतेभ्यो दीयते यदि तदा बहु गोमहिषं भागे आगच्छति आत्मने" इति विमृश्य तैस्तथैव कृतम्। भवितव्यतावशेन ग्राममध्ये गतैरपि तथैव संचिन्त्य मद्यार्धे विषं प्रक्षिप्तम्। तत्रागताः परस्परमिलिताः कूटचित्ताः सर्वेऽपि। चोरनायकौ तु निष्कूटौ स्तः। तावता सूर्योऽस्तं गतः। तौ चोरनायकौ रात्रिभोजननियमभंगभयेन न भुक्तवन्तौ। अन्ये परस्परदत्तविषसंयुक्तमद्यमांसभक्षणेन मृताः कुगतिं गताः। तौ भ्रातरौ इहलोके परलोकेच सुखिनौ जातौ रात्रिभोजनव्रतग्रहणेन जिह्वेन्द्रियदमनात्[1]।

१. तस्करनायकौ कौ? कुत्र तौ स्तः? केषां वर्षर्तुः प्राप्तः? साधवः कुत्र गताः? चोरनायकौ किं कथयतः?

---

[1] उ. सू. प. 21-22.

साधुभिः किं भणितम्? तेषां वाक्यं वद। चोराभ्यां किं कृतम्? किं वा भणितम्? साधुभिस्तदा किं भणितम्? तेषां वाक्यं वद? चोरौ किं कुरुतः? गच्छद्भिस्साधुभिः किं उपदिष्टम्? निशाभोजननियमः इत्यस्य कोऽर्थः? अन्यदा चोराभ्यां किमानीतम्? को व्यापादितः? परिवारपुरुषाः कुत्र गताः? किमर्थम्? महिषव्यापादकैः किं चिन्तितम्? किं तैस्तथैव कृतम्? किं चोरनायकाभ्यां मांसं भक्षितम्? मद्यं पीतम्? पुनः कैर्भक्षितम्? पीतं? के मृताः? कौ सुखिनौ जातौ?

२. एकस्यां, पल्यां, भ्रातरौ, गच्छतां, कः, भवतां, अस्माकं, वचः, आत्मने--एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. तस्कराणां नायकौ, साधुषु भक्तः, साधूनां दर्शनम्, चोराणां नायकौ, वर्षासु आवासः, सम्पूर्ण भक्तम्, पिण्डस्य ग्रहणम्, उचितानि गृहाणि, उपाश्रयस्य दानम्, महत् पुण्यम्, पुण्यस्य सम्बन्धः, साधूनां वचः, अत्यन्तं परितुष्टौ, वर्षाणां कालः, निशायां भोजनम्, भोजनस्य नियमः, दृढं व्रतम्, दृढः प्रयत्नः, मुनीनां सेवा, गावश्च महिषाश्च, तस्य भोजनम्, ग्रामस्य मध्यम्, जिह्वेन्द्रियस्य दमनम्, मद्यं मांसं, मद्यमांसस्य भक्षणम्—एतेषां समस्त पदानि वदत.

अष्टाविंशः पाठः

एकस्यामटव्यां महत्तरं गजयूथं वसति। यूथाधिपतिर्जातं कलभकं विनाशयति। अन्यदा तत्र एका करिणी गर्भिणी जाता एवं चिन्तयाति। "यदा कथमपि गजबालको जायते तदाऽनेन विनाश्यते"। ततस्सा करिणी यूथादपसराति। यावता यूथाधिपतिना यूथमवलोक्यते तावता द्वितीये तृतीये दिवसे सा यूथमध्ये गत्वा मिलति। एवं कुर्वन्त्या तया अन्यदा ऋष्याश्रमपदं दृष्टम्। सा तत्रगता गुप्तस्थाने प्रसूता। गजकलभो जातः। स गजः कुमारैस्सह आरामान्सिंचाति। ततस्तापसैस्तस्य सेचनक इति नाम कृतम्। स वयस्स्थो जातः। भ्रमन्तं यूथाधिपतिं दृष्ट्वा नवोदितबलः स मारितवान्। स्वयं यूथाधिपतिर्जातः। तापसाश्रममपि समूलं विनाशितवान्। "मन्मातेव अन्या करिणी अन्यं प्रच्छन्नं मातिष्ठतु" इति विचारितवांश्च। ततस्ते रुष्टा ऋषयः पुष्पफलपूर्णहस्ताः श्रेणिकस्य राज्ञः पार्श्वे गताः। कथितं च तैः—"सर्वलक्षणसम्पूर्णो हस्ती सेचनकनामा वने तिष्ठति"। ततः श्रेणिकेन स्वयं तद्वने गत्वा महता बलेन गृहीत्वा आनीय स आलानस्तम्भे बद्धः। ऋषिभिस्तत्रागत्य अतिनिर्भर्त्सितः—"गजराज क्व ते शाण्डीर्यं गतं? प्राप्तं त्वया अस्मदविनयफलम्" इति। श्रुत्वा स गजः प्रकामं रुष्टः स्तंम्भं भंक्त्वा तेषां पृष्ठे धावितः। ते सर्वे हतप्रहताः कृताः।

प्राप्तोऽटव्याम् । भग्नाः पुनरपि तेषामाश्रयाः । पुनश्श्रेणिकः तद्गजग्रहणाय गतः । तेन गजायोक्तं—"वत्स परेभ्यो दमनात्स्वयंदमनं वरम्" । इति तद्वचः श्रुत्वा स्वयमागत्यालानस्तम्भमाश्रितः[1] ।

१. गजयूथं कुत्र वसति? यूथाधिपतिः किं करोति? करिणी चिन्तयति? का चिन्ता? ततः करिणी किं करोति? तया किं दृष्टम्? तत्र सा किं कृतवती? को जातः? स किं करोति? तस्य किं नाम कृतम्? यूथाधिपतिं दृष्ट्वा स किं कृतवान्? स्वयं कथंभूतो जातः? स किं कृतवान्? किं विचारितवान्? ऋषयः कुत्र गताः? किं तैः कथितम्? ततश्श्रेणिकः किं चकार? तदा ऋषिभिः किं कृतम्? तद्वाक्यं श्रुत्वा स गजः किं कृतवान्? श्रेणिकः पुनः किं चकार? श्रेणिकस्य वचश्श्रुत्वा गजः किं कृतवान्?

२. अटव्यां, एका, कुर्वन्त्या, विनाशितवान्, राज्ञः, हस्ती, सेचनकनामा, महता, वचः—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. गजानां यूथम्, यूथस्य अधिपतिः, गजश्च बालकश्च, गजस्य बालकः, द्वितीयं दिवसम्, गुप्तं स्थानम्, ऋषीणां आश्रमपदम्, तापसानां आश्रमः, मम माता,

[1] उ. सू. प. 27.

पुष्पाणि च फलानि च, पुष्पफलैः पूर्णः, लक्षणेन सम्पूर्णः, तस्य वचः—एतेषां समस्तपदानि वदत.

एकोनत्रिंशः पाठः.

उज्जयिन्यां हस्तिमित्रश्रेष्ठी वर्तते। तस्य हस्तिभूतो नाम बालकोऽस्ति। अन्यदा हस्तिमित्रश्रेष्ठिनः प्रिया मृता। दुःखगर्भवैराग्येन हस्तिमित्रश्रेष्ठी हस्तिभूतदारकेण समं प्रव्रजितः। अन्यदा दुर्भिक्षे साधुभिस्समं विहरन् असौ हस्तिमित्रसाधुः भोजकटकनगरमार्गे अटव्यां कण्टकेन विद्धपादः अग्रे विहर्तुमक्षमोऽटव्यामेव स्थितः। तमक्षमं दृष्ट्वा साधुभिर्भणितं—"वारकेण त्वां मार्गे वहिष्यामः। मा विषादं कृथाः"। तेन भणितं—"मदायुः स्तोकमेवास्ति। अतोऽहमत्रैव भक्तं प्रत्याख्यामि। यूयं यात। मदर्थमत्र स्थितस्यान्यस्य कस्यापि साधोर्माभूद्विनाशः"। इत्युक्तवंतं क्षामयित्वा तत्रैव मुक्त्वा च अनिच्छन्तमपि क्षुल्लकं गृहीत्वा ते साधवश्चेलुः। क्षुल्लकोऽर्धमार्गात्तान्विप्रतार्य पितृमोहात्तत्रायातः। तावता गृहीतानशनः स मृतो देवोऽभवत्। क्षुल्लको मौग्ध्यात्तं मृतं न जानाति। सुप्तस्य तत्कलेबरस्य पार्श्व एव भ्रमति। क्षुधार्तोऽपि फलादिकं न गृह्णाति। स देवः क्षुल्लकमोहेन निजदेहमधिष्ठाय अवदत्। "वत्स गच्छ भिक्षायै"। क्षुल्लकेन भणितं—"कुत्र व्रजामि?" तेन भणितं—"एषु धवनिकुंजेषु

व्रज । तन्निवासिनो जना भिक्षां दास्यन्ति" । ततः तथेति भणित्वा क्षुल्लकस्तत्र गतः । धर्मलाभमुच्चचार । स देवो नरनारीरूपं विधाय करं प्रसार्य दिव्यशक्त्या तस्मै भक्तपानादि ददौ तावद्यावत् दुर्भिक्षे निवृत्ते भोजकटकनगरात् पश्चाद्वलिताः साधवस्तेनैव मार्गेण तत्रागताः। जीर्णशवं दृष्ट्वा ज्ञातदिव्यप्रयोगाः तं क्षुल्लकं गृहीत्वा विजह्रुः [1]।

१. हस्तिमित्रश्रेष्ठी कुत्र वर्तते? तस्य बालकस्य नाम किम्? का मृता? कः प्रव्रजितः? कोऽटव्यां स्थितः? किं तत्र कारणम्? साधुभिः किं भणितम्? तेन किं भणितम्? तद्वाक्यं वद । ततस्साधवः किं कृतवन्तः? क्षुल्लकः किं कृतवान्? तावता को मृतः? क्षुल्लकः किं न जानाति? स किं करोति? स देवः तदा किं अवदत्? क्षुल्लकेन किं भणितम्? तेन किं भणितम्? क्षुल्लकः कुत्र गतः? स देवः कथं तस्मै भक्तपानादि ददौ? ततः साधवः किं कृतवन्तः?

२. श्रेष्ठी, विहरन्, त्वां, अहं उक्तवन्तं—एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. नगरस्य मार्गः, न क्षमः, मम आयुः, पितरि मोहः, तस्य कलेबरम्, क्षुधा आर्तः, क्षुल्लके मोहः, नार्याः रूपम्, दिव्या शक्तिः, जीर्णं शवम्—एतेषां समस्तपदानि लिखत.

---

[1] उ. सू. प. 52.

(१) विद्धः पादः=विद्धपादः.

(२) विद्धः पादः यस्य पुरुषस्य स पुरुषः=विद्धपादः.

त्रिंशः पाठः.

उज्जयिन्यां धनमित्रो वणिक् धनशर्मनाम्ना स्वसुतेन समं प्रव्रजितः। अन्यदा मार्गे क्षुल्लकस्तृड्डीडितः। नदीं दृष्ट्वा पित्रावादि—"वत्स पिब जलम्। पश्चादालोचनया दोषशुद्धिर्भाविनी"। इत्युक्तः क्षुल्लको नेच्छति। ततः पिता साधुः स्वशंकानिरासार्थं शीघ्रं नदीमुत्तीर्याग्रे गतः। क्षुल्लको नद्यां प्रविष्टः। जलांजलिमुत्क्षिप्य चिन्तितवान्। "कथं जलं पिबामि? यतः पिपासा सोढव्या"। इति संवेगेन जलमंजलितः पश्चाद्यत्नेन मुक्तम्। ततः तृषा मृत्वा स देवो जातः। अवधिज्ञानात् अवगतपूर्वभववृत्तांतेन तेन साधूनामनुकंपया पथि गोकुलं कृतम्। तत्र तक्रादि शुद्धमिति गृहीत्वा साधवस्सुखिनो जाताः॥

१. कः प्रव्रजितः? कस्तृषा पीडितः? पित्रा किमवादि? क्षुल्लकः किं तदा करोति? पिता तदा किं कृतवान्? क्षुल्लकः कुत्र प्रविष्टः? स किं चिन्तितवान्? किमर्थं तेन जलमुत्क्षिप्तम्? किमर्थं तज्जलं मुक्तम्? स कथं भूतो जातः? तत्र पथि साधुभिः किं कृतम्?

---

[1]उ सू. प. 55.

२. वणिक्, धनशर्मनाम्ना, पिपासा, तृषा, सुखिनः–एतेषां सप्तविभक्तिषु रूपाणि वदत.

३. स्वस्य सुतः, तृषा पीडितः, दोषस्य शुद्धिः, जलस्य अंजलिः, अवधेः ज्ञानम्, पूर्वभवस्य वृत्तान्तः, गवां कुलम्––एतेषां समस्तपदानि वदत.

(१) अवगतः वृत्तान्तः=अवगतवृत्तान्तः.

(२) अवगतः वृत्तान्तो येन पुरुषेण स पुरुषः=अवगत वृत्तान्तः.

(३) पूर्वभवस्य वृत्तान्तः=पूर्वभववृत्तान्तः.

अवगतः पूर्वभववृत्तान्तो येन सः=अवगतपूर्वभववृत्तान्तः.

एकत्रिंशः पाठः.

राजगृहे नगरे चत्वारो वयस्या वणिजः सन्ति। ते श्रीभद्रबाहुगुर्वन्तिके प्रव्रज्य श्रुतं चाधीत्य एकाकिनो विहरन्तः तत्रैवागताः। तदा हेमन्त आसीत्। ते च भिक्षाभोजनमादाय तृतीयपौरुष्यां न्यवर्तन्त पुरात् पृथक्। तेषामेकस्य चरमपौरुषी वैभाराद्रिगुहाद्वारे अवगाढा। तत्रैव सोऽस्थात्। द्वितीयः पुरोद्याने। तृतीयस्तु उद्यानसमीपे। चतुर्थस्तु पुराभ्यर्णे। तत्र यो वैभाराद्रिगुहासन्नः स महाशीतव्यथितः रजन्या आद्ययामे मृतः। उद्यानस्थो द्वितीय-

यामे मृतः । उद्यानासन्नस्तृतीययामे मृतः । पुरासन्नस्तु पुरोष्मणाऽल्पशीतत्वेन चतुर्थे प्रहरे मृतः। सर्वेऽप्येते साधवः विपद्य दिवं जग्मुः । अतश्शीतं सोढव्यमिति जैना वदन्ति[1] ।

तृतीयपौरुषी=अपराह्णः, चरमपौरुषी=सायंकालः ।

१. कुत्र वणिजस्सन्ति ? कति सन्ति ? कथंभूतास्ते ? ते कुत्रागताः ? किं कृत्वा तत्रागताः ? तदा कः काल आसीत् ? भोजनमादाय ते कुत्र न्यवर्तन्त ? एकस्य सायंकालः कुत्राऽसीत् ? स तदा कुत्र स्थितः ? द्वितीयस्य कुत्र सायंकालः ? तृतीयस्य कुत्र ? चतुर्थस्य कुत्र ? वैभाराद्रिगुहासन्नः को जातः । द्वितीयः कुत्र मृतः ? तृतीयः कुत्र मृतः ? चतुर्थः कुत्र ? मरणानन्तरं ते कुत्र गताः ? किं सोढव्यं जैनैः ?

२. गुरोः, एकाकिनः, विहरन्तः, रजन्याः, ऊष्म— एतेषां सप्तविभक्तिषु रूपाणि वदत ।

३. गुरोः अन्तिकम्, भिक्षया भोजनं, तृतीया पौरुषी, गुहायाः द्वारम्, शीतेन व्यथितः, पुरस्य उद्यानम्, उद्यानस्य समीपम्, आद्यो यामः, चरमा पौरुषी, तृतीयो यामः, पुरस्य ऊष्म—एतेषां समस्तपदानि लिखत ।

---

[1] उ. सू. प. 56.

द्वात्रिंशः पाठः.

तगरानगर्यां अर्हन्मित्राचार्यपार्श्वे दत्तनामा वणिक् भार्यया भद्रया अर्हन्नकेन पुत्रेण च समं प्रव्रजितः। पित्रा सर्ववैयावृत्यकरणेन इतस्ततः परिभ्रम्य भव्यभिक्षाभोजनसंपादनेन स बालोऽत्यन्तं सुखी कृतः। उपविष्ट एव भुङ्क्ते। कदाऽपि भिक्षायै न भ्रमति। तद्भिक्षार्थं स्वभिक्षार्थं च पितैव भ्रमति। अन्यदा पितरि मृते साधुभिः प्रेरितः स बालो ग्रीष्मे मासे भिक्षार्थं गतः। तापाभिभूतः प्रोत्तुंगगृहच्छायायामुपविशति। पुनस्तत उत्तिष्ठति। शनैश्शनैर्याति। एवं कुर्वन्तं तमर्हन्नककुमारं रूपेण कन्दर्पावतारं दृष्ट्वा काचित् प्रोषितवणिग्भार्या आकार्य गृहे स्थापितवती। तया सह स विषयासक्तोऽभूत्। अथ तन्माता साध्वी पुत्रमोहेन "अरे अर्हन्नक" इति निर्घोषयन्ती चतुष्पथादिषु भ्रमति। एकदा गवाक्षस्थेन अर्हन्नकेन तादृशावस्था माता दृष्टा। संजातसंवेगः स गवाक्षादुत्तीर्य पादयोः पतित्वा मातरमेवमाह—"हे मातः सोऽहमर्हन्नकः" इति। तद्वचश्श्रवणात् स्वस्थचित्ता माता तमेवमाह—"वत्स भव्यकुलजातस्य तव केयमवस्था?" स प्राह—"मातः चरित्रं पालयितुं अहं न शक्नोमि"। सा प्राह—"तर्हि अनशनं कुरु"। मातृवचसा स तप्तशिलायां सुप्त्वा उष्णं विषह्य समाधिभाक् देवत्वं प्राप्तवान्[1]।

---

[1] उ. सू. प. 58–60.

१. दत्तनामा वणिक् केन समं कया च सह कुत्र प्रव्राजितः? पुत्रः कथं सुखी कृतः? स भिक्षायै भ्रमति वा? पितरि मृते स किं कृतवान्? स तापाभिभूतः किं करोति? तदा वणिग्भार्या तं दृष्ट्वा किं कृतवती? तन्माता ततः किं करोति? अर्हन्नकेन सा दृष्टा किम्? स मातरं किमाह? माता तं किमाह? स अनशनं कृत्वा किं कृतवान्?

२. दत्तनामा, वणिक्, पित्रा, सुखी, माता, समाधि-भाक्, प्राप्तवान्—एतेषां सप्तविभक्तिषु रूपाणि वदत।

३. तप्ता शिला, मातुः वचः, न अशनम्, भव्यं कुलम्, भव्यकुले जातः, पुत्रे मोहः, विषये आसक्तः, गृहस्य=छाया, कन्दर्पस्य अवतारः, आचार्यस्य पार्श्वः, तस्य माता—एतेषां समस्तपदानि वदत।